या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।

यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ २.६९ ॥

yā niśā sarvabhūtānāṁ tasyāṁ jāgarti saṁyamī ।
yasyāṁ jāgrati bhūtāni sā niśā paśyato muneḥ ।। 2.69।।

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।

तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ २.७० ॥

āpūryamāṇamacalapratiṣṭhaṁ samudramāpaḥ praviśanti yadvat ।
tadvatkāmā yaṁ praviśanti sarve sa śāntimāpnoti na kāmakāmī ।। 2.70।।

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।

निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ २.७१ ॥

vihāya kāmānyaḥ sarvānpumāṁścarati niḥspṛhaḥ ।
nirmamo nirahaṅkāraḥ sa śāntimadhigacchati ।। 2.71।।

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।

स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ २.७२ ॥

eṣā brāhmī sthitiḥ pārtha naināṁ prāpya vimuhyati ।
sthitvāsyāmantakāle'pi brahmanirvāṇamṛcchati ।। 2.72।।

ॐ तत्सदिति श्रीमद् भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे

श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥ २ ॥

om tatsaditi śrīmad bhagavadgītāsūpaniṣatsu brahmavidyāyāṁ
yogaśāstre śrīkṛṣṇārjunasaṁvāde sāṅkhyayogo nāma dvitīyo'dhyāyaḥ